**Paper – <u>DSE-3</u>**

**Section – A, Unit - I**

# <u>वैयाकरणसिद्धान्तकौमुद्यां स्त्री-प्रत्ययप्रकरणम्</u>

स्त्री-प्रत्ययाः –

१) टाप्, २) डाप्, ३) चाप्, ४) ङीप्, ५) ङीष्, ६) ङीन्, ७) ऊङ् ।

**टाप्-प्रत्ययः**

१) **<u>अजाद्यतष्टाप्</u>** – अजः आदिर्येषां ते अजादयः ते च अच्चेति समाहारद्वन्द्वात् षष्ठी । अजादीनाम् अकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात् ।

उदाहरणम् – अजा, अश्वा, चटका, मूषिका ..... ।

<u>साधनप्रक्रिया</u> – **अजा**

अज टाप् —— १) 'अजाद्यतष्टाप्'

अज आ —— २) 'हलन्त्यम्' (प्-कारस्य इत्-संज्ञा)

३) 'चुटू' (ट्-कारस्य इत्-संज्ञा)

४) 'तस्य लोपः' (इत्-संज्ञकस्य प्-कारस्य ट्-कारस्य च लोपः)

५) 'अदर्शनं लोपः'

अज् अ आ

अज् आ ६) 'अकः सवर्णे दीर्घः'
७) 'तस्मिन्निति निर्दिष्टे पूर्वस्य'

अजा सु ८) 'ङ्याप् प्रातिपदिकात्'
९) 'स्वौजसमौट्.....'

अजा स् १०) 'उपदेशेऽजनुनासिक इत्'
११) 'तस्य लोपः'
१२) 'अदर्शनं लोपः'

अजा स् १३) 'अपृक्त एकाल्प्रत्ययः'
अजा १४) 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्'